# आचार्यरामजीउपाध्यायस्य ग्रामाभ्युदयम्

**नारायणदाशः**

स्वाधीनोत्तरभारतस्य विविधविद्यावतामाचार्याणां समक्षं नाना समस्याः विलसन्ति स्म–यथा भारतीयसंस्कृतेः पुनः प्रतिष्ठा, प्राच्यविद्यायाः गभीराध्ययनम्, प्राच्यविद्यया सह आधुनिकसमाजस्य संयोगसेतुनिर्माण–मित्यादि। आपामरचण्डालैः सह प्रतिष्ठितपदासीनाः आचार्याः अपि स्वस्वशैल्या भारतस्य तस्मिन् पुनर्निर्माणे स्वकीयं योगदानं कृतवन्तः। अस्मिन् पर्याये आगच्छन्ति राहुलसांकृत्यायन, हजारीप्रसादद्विवेदी, विद्यानिवासमिश्र इत्यादयः बहवः योगजन्मानः साधकाः ऋषयः तपस्विनश्च। तेषु अन्यतमाः सन्ति आचार्याः रामजीउपाध्यायाः इति जानीमो वयम्।

स्वजन्मना उत्तरप्रदेशस्य बलियाजनपदं विभूषयन्त एते इदानीं डॉ. हरीसिंहगौरविश्वविद्यालय इति सुप्रथिते तदा सागरविश्वविद्यालय इति सद्यः प्रतिष्ठिते विश्वविद्यालये संस्कृतविभागे 1947 ईसवीये संवत्सरे नियुक्ताः 1980 यावत् आचार्यपदात् सेवानिवृत्ताः जाताः। विविधग्रन्थ–प्रणयनेन सह आधुनिकदृष्ट्या गवेषणस्य अयमारम्भस्तेन एव प्रारब्धस्तत्र। संस्कृतकवीनां व्यक्तित्वं विकासं च इति विषये तदधीने एव राधावल्लभत्रिपाठिनः शोधप्रबन्धं प्रस्तुतवन्तः। पुनश्च तेषामाध्यक्ष्ये एव संस्कृतपरिषद् आरचिता या प्रायः 42 वर्षेभ्यः सागरिकां प्रकाश्य सागरसौरभं दिक्षु विदिक्षु वितनोति। यदा वयं स्नातकोत्तरकक्षे पठनार्थं 1992 ई.सं. प्रविष्टाः तदा तु तैः सह तेषां प्रियशिष्याणां त्रिपाठिमहोदयानां कीर्त्तधवलं यशः दिगन्तविस्तृतम् आसीत्। आधुनिकसंस्कृतसाहित्यस्य पठनपाठनगवेषणादिदृष्ट्या तदारभ्य एव अयं संस्कृतविभागो विराजते स्म स्वीयाम् अत्युच्चतमां कोटिमाटीकमानः। कर्णाकर्णिकया क्रमशः सर्वमस्माभिः ज्ञातचरमभवत्।

विविधविद्यास्थानेषु स्वलेखनीं व्यापारयन्त एते विविधग्रन्थान् प्रणयामास। तेषु मुख्याः सन्ति–1. मध्यकालिकं संस्कृतनाटकम् 2. आधुनिकं संस्कृतनाटकम् 3. प्राचीन भारतीय सहित्य की सांस्कृतिक भूमिका 4. भारतस्य सांस्कृतिकनिधिः 5. दशरूपकतत्त्वदर्शनम् 6. नाट्यशास्त्रीयप्रयोगविज्ञानम् 7. सीताभ्युदयम् 8. कैकेयीविजयम्

9. अशोकविजयम् 10. नन्दगौतमीयम् 11. शम्बूकचरितम् 12. द्वा सुपर्णा 13. सत्यहरिश्चन्द्रोदयम् 14. आधुनिकसंस्कृतसाहित्यानुशीलनम् 15. महाकविः कालिदासः 16. संस्कृत तथा प्राकृत महाकाव्यानि 17. मनुस्मृतिनवनीतम् इत्यादयः।

न केवलं प्रो. उपाध्यायस्य निरवद्यं गद्यं विलसति तस्य गद्यसाहित्ये अपितु नाटकेषु शोधग्रन्थेषु अपि। तस्य उपन्यासद्वयी वर्तते 1. द्वा सुपर्णा 2. सत्यहरिश्चन्द्रोदयम् इति। अत्र प्रबन्धविस्तरभयात् केवलं द्वा सुपर्णा इत्यस्य परिचयः प्रदीयते। अस्मिन् पौराणिके कथाग्रन्थे लेखकः ग्रामाभ्युदयं सम्यक्तया वर्णयति।

**1. कथाशीर्षकम्–**

द्वा सुपर्णा इति आर्षं नाम स्वीकृत्य औपन्यासिकः श्रीउपाध्यायः अत्र कृष्णसुदाम्नोः प्रसिद्धां कथां नव्यभव्यशैल्या वर्णयति। एषा कथा भारतस्य ग्राम्यजीवनस्य एव प्रातिनिध्यं वदति। अधुनापि तथा सख्यं लक्ष्यते भारताजिरे। वेदे सख्योः चेष्टितमनया ऋचा सम्यक् एव प्रतिपादितं वर्तते। यथा–

**द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते।**
**तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीति।।**

**ऋग्. 1.164.20।।**

**2. प्रकरणवक्रता–**

उपन्यासकारः स्वीयेषु इतरग्रन्थेषु इव अत्रापि प्रकरणवक्रताम् आश्रित्य महाभारतीयकथां सामाजिकसंस्कारदृष्ट्या परिवर्तयति। तस्य मतेन सुदामा ब्रह्मतेजोमयः आसीत् इति सर्वदा लौकिकवैभवात् दूरे तिष्ठति स्म। कुत्र त्वं भारतसाम्राज्याधीशपदार्हः, क्वाहमकिञ्चनो ब्रह्मैकधनो ब्राह्मणः। पृ.16। स जानाति स्म यदि गुरुमात्रा दत्तानि चणकानि कृष्णाय अपर्यति तर्हि सः तस्मै प्रत्यक्षं परोक्षं वा धनं प्रदास्यति। अतः न ददाति। यदि कृष्णाय भोजनमहं ददामि, तर्हि क्षिप्रमेव ब्राह्मणोचिता दरिद्रता मां परित्यक्ष्यति। पृ.7।

### 3. गुरुकुलं–ग्रामस्य पुनः निर्माणम्

उपन्यासस्य पूर्वभागे सुदाम–कृष्ण–बलरामाणां गुरुकुलवासः, शिक्षापद्धतिः, सुदाम्नः विवाहादिप्रसङ्गाः आगच्छन्ति। आचार्यवसतेः वर्णनं यथा–तत्र रमणीयवनभूभागे होमधूपः पताका इवाचार्यवसतिं विज्ञापयति स्म। पृ. 13।

### 4. यमुना–शिप्रादिनदनदीनां भव्यं वर्णनम्–

यमुनातीरस्य आकर्षणमाकर्षति नवदम्पती विरोधालङ्कारपूरितैः वचोभिः। तरणितनूजापि सा शीतलजलौघपूर्णा स्नायिनां तापमपहृतवती, यमस्य भगिनि अपि यमुना माथुरेभ्यो जीवनं ददाति स्म। कृष्णजलापि सा निमग्नानां दर्शकानामपि पापकार्ष्ण्यमपाकरोति स्म।....... विप्रकृष्टापि सा तरङ्गिणी तरङ्गहस्तैः दम्पत्योः आह्वानं कृतवतीव तयोर्मनसि...........।पृ. 31। यमुनाजलसम्पृक्तसुखस्पर्शशीतलवाताः विप्रकृष्टानामपि वनगुल्मौषधीनां सौरभमुपपदीकृतवन्तः। पृ.25।

### 5. ग्रामवर्णनम्–

ततोऽपि अग्रे लेखकः कश्चन समाजसंस्कारक इव प्रतिभाति। विविधोपमासम्भारैः ग्रामं विशदयति– सर्वत्र स्वच्छता, शुक्लता, विशदता च ग्रामप्रहास इवाभिव्यक्ताः। पृ. 67। ग्रामीणसन्न्यासिनः चित्रणं यथा–ग्रामीणपरिधानम्, तदपि स्वल्पमेव धारयन्तम्, श्रीहीनम्, अवधूतम्, तपसा क्षामम्, धमनिसन्ततं च तं ब्राह्मण.............पर्यचरत्। पृ. 64। कथाकारः ग्राम्यजनानां धनहीनत्वम् अलङ्कारप्रियत्वं च युगपदेव प्रतिपादयति तेषां कृत्रिमालङ्कारक्रयणं निरूप्य प्राकृता ग्रामीण जना अलङ्काराणां क्रये प्रायशः वञ्चिता एवाधिकं धनं दत्त्वापि कृत्रिमालङ्कारं क्रीणन्ति। पृ.51। वरयात्रायां सुदाम्नः वर्णनमित्थं करोति कथालेखकः–वरयात्रादिवसे सुदामा चतुर्वर्णानां वृद्धजनानामाशीर्वचांसि समवयस्कानामभिनन्दनानि, बालकानां चाभिवन्दनानि सम्प्रहृष्टमानस एव जग्राह। पृ.23। जलाशया वरयात्रादर्शनोत्सुका नेत्राणीवारविन्दकुलान्यति–विकचय्यामोदमुपजह्रुः। पृ. 25।

**6. ग्रामाभ्युदयम्–**

सुदाम्नः नवविवाहिता पत्नी कौमुदी ग्राममागत्य कुसंस्कारान् दूरीकृत्य कन्या–युवक–वृद्धानां च शिक्षाव्यवस्थां व्यवस्थापयति। नवदम्पती शिक्षया सह खादीवस्त्रोद्योग–ग्रामोद्योगादिविकासाय आश्रममुद्घाट्य कृष्णस्य सहयोगेन ग्रामाभ्युदयं साधयतः। तेन लोकाभ्युदयेन सह राष्ट्राभ्युदयोऽपि भवेदिति उपन्यासकारस्य सम्मतम्। अत्र गुरुकुलस्य सौहार्दमयजीवनं स्वस्थग्राम्यजीवनं तदर्थम् अनासक्तकर्मणः महत्त्वं प्रतिपादयन् कथाकारः सामाजिकसमरसताम् सृजन्तं सुदाम्नं फलरसास्वादकेन पक्षिणा तोलयति, तेन सर्वथा विरक्तः द्वारकाधिपतिः आत्मसाक्षिकतया तस्य दर्शनमात्रेण कृतकृत्यो भूत्वा अपरपक्षिणा साम्यं याति।

**7. पुरातनस्य प्रत्यग्रीकरणम्–**

पारम्परिकालङ्कारैः पुरातनीमपि इमां कथां प्रत्यग्रीकरोति कथाकारः–रात्रिकाले शिप्रा स्वजलौघमुज्जयिन्या उपायनरूपेण सरित्पतिं प्रति प्राहिणोत्। पृ.9। यमुना तु सैकतोत्सङ्गसुखोचितानाम्, प्राज्यैः पयोभिः परिवर्धितानां च माथुराणां सामान्यधात्रीव सम्मानिता।पृ.31।

एवमेव कथयितुं सुशक्यं यत् द्वा सुपर्णा इति उपन्यासे आचार्यः रामजीउपाध्यायः भारतस्य सांस्कृतिकनिधिभूतस्य ग्राम्यजीवनस्य भव्यं वर्णनं विधाय सुसंहृतरूपेण निष्कामसमाजसेवया तस्य समृद्धिविधानं विधातुं शक्यमिति प्रतिपादयति। नदीनगरनागरिकाणां वर्णनेन स्वीयं कथाग्रन्थस्य लोकाभिमुखित्वमपि साधितं तेन इति कथनीयं नावशिष्यते एव।

कथायाः विविधभेदान् प्रतिपादयित्वा उपन्यासमित्थं लक्षयन्ति प्रो. राधावल्लभत्रिपाठिनः गद्यबद्ध उपन्यासो महाकाव्यमयी कथा। (अभिनवकाव्यालङ्कारसूत्रम् 3.1.1)

प्रो. राजेन्द्रमिश्रकृतं लक्षणं यथा–

**कथाख्यायिकयोः कश्चिन्मिश्रभेदोऽपि साम्प्रतम्।**
**उपन्यास इति ख्यातो भाषान्तरप्रतिष्ठितः।।**
**कालखण्डविशेषस्य समग्रं जनजीवनम्।**
**प्रतिबिम्ब इवादर्शे न्यस्यतेऽत्र सविस्तरम्।।**

**क्वचित् सामाजिकी क्रान्तिः सर्वोदयसमर्थिनी।**
**रूढिपाखण्डविध्वंसो नवाचारः क्वचित् पुनः।।**
**महाकाव्यवदेवायमुपन्यासोऽपि वस्तुतः।**
**साङ्गोपाङ्गं समग्रं च नेतृजीवनचित्रणम्।**
**(अभिराजयशोभूषणम्, कारिका. 105)**

प्रो. रहसविहारिद्विवेदानां लक्षणमित्थमस्ति–

**गद्यकाव्यं बृहद्बन्ध उपन्यासोऽभिधीयते।**
**अस्मिन् युगोचितं वस्तु पात्रकविसमीहितम्।।**
**देशकालोचितं चित्रं गद्यशिल्पमनोहरम्।**
**कल्पितं चापि तत्सर्वं यथार्थं सत्प्रतीयते।।**

उपर्युक्तलक्षणानां पर्यालोचनेन ज्ञायते यत्–द्वापरयुगस्य तस्य कालखण्डविशेषस्य समग्रं जनजीवनं प्रतिबिम्बयन् उपन्यासोऽयं युगोचितं संस्कारं वहन् ग्रामाभ्युदयक्रान्तिं सम्यक्तया विशदयन् क्वचित् महाकाव्यमयत्वं प्राप्य स्वीयसाफल्यं प्रतिष्ठापयतीत्यलं बहुना।

*सहाचार्यः, संस्कृतविभागे*
*रामकृष्णमिशनावासीयस्वयंशासितमहाविद्यालयः,*
*नरेन्द्रपुरम्, कोलकाता – 700 103*

–––000–––